# संस्कृतवार्ता:

दिनाङ्कः-10.05.2025 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- भारत-पाकिस्तान देशौ युद्ध विरामे साहमत्यं प्रकटितवन्तौ।
- ऑपरेशन सिंदूर इत्यस्य अन्तर्गत पाकिस्ताने जैश-ए-मोहम्मद अथ च लश्कर-ए-तैयबा इत्यनयोः आतङ्कि-गुल्मयोः पञ्च कुख्याताः आतंकवादिनः व्यापादिताः।
- अमरीकाया: राष्ट्रपति: डोनाल्ड-ट्रंप: रूस-यूक्रेन देशाभ्यां त्रिंशत् दिवसेभ्य: युद्ध विरामस्य आवश्यकतां प्रतिपादितवान्।
- अद्य शंघाई नगरे शरसंधान-विश्व-चषक-स्पर्धाया: द्वितीय-स्तरे भारतदेशेन त्रीणि पदकानि विजितानि।

---------------------------------------

<u>युद्ध विराम:</u>

भारत-पाकिस्तान देशौ युद्ध विरामे साहमत्यं प्रकटितवन्तौ। विदेश सचिव: विक्रम मिसरी अवोचत् यत् देशद्वयेन सैन्याभियानस्य स्थगने सहमति: प्रकटिता। अमुना उक्तं यत् पाकिस्तानस्य सैन्याभियानस्य महा-निदेशक: अपराह्ने विषयेऽस्मिन् सहमतिं प्रकटितवान्। विदेशमत्रालस्य स्रोतोभि: सूचितं यत् देशद्वये संवादस्य अन्य विषयस्य च कापि सूचना नास्ति।

---------------------------------------

<u>ऑपरेशन-सिंदूर</u>

भारतीयसशस्त्रबलैः पाकिस्तानेन कृत उत्तेजक कार्याचरणानां प्रत्युत्तरे तस्य प्रौद्योगिक्याधारभूत संरचनायां, नेतृत्व-नियंत्रण केन्द्रयोः, रडार-यन्त्र-स्थलेषु, सस्त्र भण्डारेषु सैन्यलक्ष्येषु च सटीकप्रहारः कृतः। भारतेन भारतीययुद्धविमानैः वायुप्रक्षेपास्त्राणां उपयोगेन रफीकी, मुरिद, चकलाला, रहीमयार खान इत्यादिसु स्थलेषु लक्ष्यं कृतम् । अद्य नवदिल्ल्यां

ऑपरेशन सिन्दूर विषये वार्ताहर सम्मेलने विंग कमांडर व्योमिकासिंहः सशस्त्रसेनया कृतानां कार्याणां विवरणं प्रदत्तवती। सा सूचितवती यत् पाकिस्तानसैनिका: अग्रिम क्षेत्राणि प्रति वर्धन्तः दृष्टाः। एतेषां अभिप्रायं स्पष्टं दृश्यते यत् पाकिस्तानं स्थितिं इतोपि गभीरं कर्तुम् इच्छति। सा प्रतिपादितवती यत् भारतीयसशस्त्रसेनाः परिचालनसज्जतायाः अवस्थायां सन्ति, सर्वेषां शत्रुकार्याणां प्रभावीरूपेण प्रतिकारः कृतः च।

विङ्ग-कमाण्डर् व्योमिकासिंहः अवदत् यत् पाकिस्तानस्य कार्याचरणस्य प्रतिक्रियारूपेण भारतीयसशस्त्रसेनया केवलं चिह्नितेषु सैन्यलक्ष्येषु एव सटीकप्रहार: कृत:। सा अवदत् यत् पसुर-सियाल्कोट्-क्षेत्रयोः विमानस्थानकयोः च रडार-स्थलानि अपि लक्षितानि । विङ्गकमाण्डर् व्योमिकासिंहः सूचितवती यत् पाकिस्तानसेना ड्रोन् यन्त्राणि, दीर्घदूरपर्यन्तं प्रक्षेप्य-असत्राणि, योध्रि विमानानि च उपयुज्य पश्चिमसीमायां निरन्तरं आक्रमणं करोति। सा अवदत्, भारतेन प्रभावीरूपेण आक्रमणानि निष्प्रभावीकृतानि।

विङ्ग कमांडर अवदत् यत् पाकिस्तानपक्षः श्रीनगरतः छलियापर्यन्तं षड् विंशत्यधिकेषु स्थानेषु वायुमार्गेण प्रविष्टुं प्रयतते स्म, तैः उधमपुर, भुज, पठानकोट्, बठिंडा  इत्यत्र वायुसेनास्थानकेषु देशस्य उपकरणानां, कर्मचारिणां च क्षतिं कृतवन्तः। करनल कुरैशी इत्यनया उक्तं यत् पाकिस्तानेन गतरात्रौ पञ्जाबस्य वायुसेनास्थानकं लक्ष्यं कर्तुं उच्चगति प्रक्षेपास्त्राणां प्रयोगः कृतः तथा च ते श्रीनगर, अवन्तिपुर, उधमपुर इत्येतेषु स्वास्थ्य-सुविधासु विद्यालयेषु च आक्रमणं कृतवन्तः। सा अवदत्, भारतीयसशस्त्रसेना स्थितिम् अप्रवर्धनाय प्रतिबद्धा अस्ति, यद्यपि पाकिस्तानः प्रतिकारं न कुर्यात्। विङ्गकमाण्डर् व्योमिकासिंहः अपि पाकिस्तानस्य दुर्भावनापूर्णं मिथ्या सूचना-प्रसाराभियानम् अपि सूचितवती यत् ते भारतीय-एस-चतुःशतं-प्रणालीं नष्टं कृतवन्तः, सूरतगढ-सिरसा-नगरयोः विमानक्षेत्रौ चापि नष्टं कृतवन्तः। पाकिस्तानेन प्रसारितानि एतानि मिथ्या-भ्रामक साक्ष्याणि सा निर्विवादरूपेण अस्वीकृतवती ।

वार्ताहर सम्मेलनावधौ भारतेन पाकिस्तानस्य प्रचारस्य प्रतिकारार्थं स्वविमानस्थानकानि अक्षतिग्रस्तानि दर्शयन्तः समयमुद्रितचित्रमपि प्रकाशितम्। पाकिस्तानप्रशासनेन अभिमतं प्रकाशितम् यत् सिरसा-सूरतगढयोः च विमानस्थानकौ तेषां शस्त्रव्यवस्थाया: लक्ष्यं कृतम् इति । विदेशसचिवः विक्रममिस्री अवदत् यत्, पाकिस्तानस्य एव पदक्षेपेण उत्तेजनं, व्याप्तिः च अभवत् तथा च पाकिस्तानस्य कार्याणां प्रतिक्रियारूपेण भारतेन मापित-प्रतिक्रिया प्रदत्ता। विदेशसचिवः

बोधितवान् यत् पाकिस्तानदेशः विशेषतया जम्मू-कश्मीर-पञ्जाब-राज्ययोः नागरिकान् नागरिकाधारभूतसंरचनान् लक्ष्यं कृत्वा निन्दनीयं अभियानं निरन्तरं प्रचालयति। श्रीमिस्री पाकिस्तानस्य धार्मिकस्थलेषु क्षेपास्त्रप्रहारस्य अभिमतम् निराधारोपि उक्तवान्। सः अवदत् यत् पाकिस्तानदेशः भारतीयक्षेपास्त्रैः अफगानिस्तानदेशे प्रहारितः इति उद्घोषयति।

श्रीमिस्री अवदत् यत्, अफगानिस्तानस्य जनान् अवबोधनस्यावश्यकता नास्ति ते पूर्णतया अवगताः सन्ति यत् केन देशेन नागरिकान् देशस्य आधारभूतसंरचनां च लक्ष्यं कृतम्। श्रीमिस्री अवदत् यत् भारतस्य विभाजनस्य एते पङ्गुप्रयासाः असफलतायाः कारणात् भारतस्य श्री अमृतसरसाहेब इत्यत्र क्षेपास्त्रप्रहारस्य विषये पाकिस्तानी अधिकारिणः अपि हास्यास्पद अभिमतम् प्रकटयन्ति।

---------------------------------------

विदेशमन्त्री

भारत-पाकिस्तानयोः प्रवर्तितावरोधस्य मध्ये विदेश-मन्त्री डॉ. सुब्रमण्यम-जयशङ्करः अद्य प्रातः अमरीकीयाः विदेश-मन्त्रिणा मार्को रुबियो इत्यमुना सह संवादम् अकरोत्। सामाजिक-सञ्चार-पटले डॉ. जयशङ्करः अवोचत् यत् भारतस्य दृष्टिकोणं सदैव सन्तुलितं दायित्वपूर्णं च अवर्तत्। अग्रे अपि एवमेव प्रवर्तिष्यते च।

अमरीकीयाः विदेश-विभागस्य पक्षतः प्रसारिते वक्तव्ये तत्रत्यः प्रवक्ता टैमी ब्रूस इत्यसौ अवोचत् यत् विदेशमन्त्रिणा मार्को रुबियो इत्यनेन उभाभ्यां पक्षाभ्याम् अवरोधम् अपाकर्तुं साक्षात् संवादं स्थापयितुं च सबलं प्रोक्तम्। तेनोक्तं यत् अमेरिकया भविष्ये एतादृशान् विवादान् निरसितुं चर्चायाः समर्थनस्य प्रस्तावः अपि उपस्थापितः।

---------------------------------------

आतङ्कि-गुल्म

भारतेन मे मासस्य सप्तमे दिने आरब्धस्य ऑपरेशन सिंदूर इत्यस्य अनन्तरं पाकिस्ताने जैश-ए-मोहम्मद अथ च लश्कर-ए-तैयबा इत्यनयोः आतङ्कि-गुल्मयोः पञ्च कुख्याताः आतंकवादिनः व्यापादिताः। सूत्राणाम् अनुसारेण एतेषु आतङ्कवादिषु मुदस्सर-खादियन खास उर्फ अबू जुंदालः

मौलाना मसूद-अजहरस्य निकट-सम्बन्धि हाफिज मुहम्मद जमीलः , मोहम्मद यूसुफ अजहरः खालिद उर्फ अबु अक्शा अथ च मोहम्मद हसन खानः सम्मिलिताः सन्ति।

---------------------------------------

प्रशासनं प्रसारण-समवायाः

प्रशासनेन समाभ्य: प्रसारण-वाहिनीभ्यः परामर्शः प्रसारितः यत् ताः सामुदायिक-जागरूकताभियानम् अतिरिच्य निज-कार्यक्रमेषु नागरिक-सुरक्षा वायवीयाक्रमणस्य सञ्चेतना ध्वनेः प्रयोगं मा कुर्युः। गृह-मन्त्रालयेन स्वीये वक्तव्ये प्रोक्तं यत् नियमित-सञ्चेतनायाः ध्वनेः प्रयोगेण वायवीयाक्रमणस्य सञ्चेतनायाः ध्वनिं प्रति नागरिकाणां संवेदनशीलतायां न्यूनता भवितुं शक्यते। अथ च नागरिकाः वास्तविक- वायवीयाक्रमणस्य अवधौ एनं सामान्यां अवगन्तुं शक्नुवन्ति।

---------------------------------------

ट्रंप-यूक्रेन

अमरीकाया: राष्ट्रपति: डोनाल्ड-ट्रंप: रूस-यूक्रेन देशाभ्यां त्रिंशत दिवसेभ्य: युद्ध विरामस्य आवश्यकतां प्रतिपादितवान्। तेन संचेतितम् यत् उल्लंघनं विहिते सति नूतन प्रतिबंधा: स्थापयिष्यन्ति।

---------------------------------------

प्रधानमन्त्रिणः उपवेशनम्

प्रधानमन्त्री नरेन्द्र-मोदी अद्य रक्षा-मन्त्रिणा राजनाथसिंहेन अथ च सैन्यत्रयस्य प्रमुखैः सह उपवेशनम् अकरोत्। राष्ट्रिय-सुरक्षा-परामर्शदः अजीत डोभालः अपि उपवेशने उपस्थितः अवर्तत। पाकिस्तानं विरुध्य भारतस्य प्रत्युत्तरित-कार्याचरणस्य मध्ये इदम् उपवेशनं राजधान्यां नवदिल्ल्यां प्रधानमन्त्री आवासे अभवत्।

---------------------------------------

शरसंधान-विश्व-चषक

अद्य शंघाई नगरे शरसंधान-विश्व-चषक-स्पर्धाया: द्वितीय-स्तरे भारतदेशेन त्रीणि पदकानि विजितानि। अंतिम-स्पर्धायां अभिषेक वर्मा-ओजस् देवताले-रिषभ यादव-इत्येतेषां संयुक्त दलेन मैक्सिको दलं पराजितम्। स्वर्णपदकं च प्राप्तम्।

।। इति वार्ता: ।।